**दिनाङ्क :- 19.10.2025**

**प्रात: - 06:55**

**<u>जी.एस.टी-वार्ताहरसम्वादः</u>**

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनवर्या अवदत् यत्, जी. एस्. टी. इत्यस्य द्वितीय-संस्करणस्य परिष्कारेण देशस्य अर्थव्यवस्था महतीं वृद्धिम् अवाप्नोत्, येन उत्सवसमये इलेक्ट्रानिक्स्, आटोमोबाइल्स्, उपभोक्तृ-वस्तूनि चेत्यादिषु प्रमुख-क्षेत्रेषु सर्वोत्तम-विक्रयणं जातम् अस्ति । सा ह्यः नवदिल्ल्यां सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन, वाणिज्य-उद्योग-मन्त्रिणा पियूष्-गोयल् इत्यनेन च सह **<u>जी. एस्. टी. बचत्-उत्सव</u>** इत्यस्मिन् विषये संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयन्ती आसीत् । वित्तमन्त्रिणा प्रोक्तं यत्, जी. एस्. टी. इत्यस्य देयमितौ अपचितिलाभः सामान्यजनेभ्यः प्रदीयते इति। अस्मिन् अवसरे वार्तालापं कुर्वन्, सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, अस्मिन् वर्षे नवरात्रि-उत्सवे सर्वोतम-विक्रयणं दृष्टम् अस्ति । सः अवदत् यत्, अस्मिन् वर्षे नवरात्र्युत्सवावधौ इलेक्ट्रानिक्स् इत्यस्य विक्रयणे पूर्वतनस्य नवरात्रि-उत्सवस्य विक्रयणेन तुल्यं पञ्चविंशति-प्रतिशन्मितस्य वृद्धिः अभवत् इति। सः अवदत् यत्, जी. एस्. टी.-परिष्कारैः खाद्यपदार्थानां मूल्येषु अपि अपचितिः जाता । जी. एस्. टी. बचत्-उत्सव इत्यस्मिन् विषये वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः अवदत् यत्, नवरात्रि-समये वाहनानां विक्रयणं अभूतपूर्वरूपेण वर्धितम् अस्ति । सः अवदत् यत्, एतादृशस्य अस्थिर-वैश्विक-परिदृश्यस्य समये देशस्य वृद्धि एतावता प्रबलगत्या प्रचलन्ती अस्ति येन अन्ताराष्ट्रिय-मुद्रा-कोषेन अपि देशस्य वृद्धेः पूर्वानुमानं संशोध्य षड्-दशमलव-षड्-प्रतिशन्मितं यावत् वर्धितम् अस्ति।

**<u>चन्द्रयान-द्वितीयोपग्रहः</u>**

भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनेन ऐतिहासिकं वैज्ञानिकं परिणामम् उद्घोषितं यत् तस्य चन्द्रयान-द्वितीयोपग्रहः स्वस्य वैज्ञानिक-उपकरणस्य उपयोगेन सूर्यात् चन्द्रस्य उपरि कोरोनल्-मास्-इजेक्शन् इत्यस्य प्रभावस्य प्रथमवारं अवलोकनं कृतवान् । बेङ्गलूरु-नगरे स्थितेन अन्तरिक्ष-संघटनस्य मुख्यालयेन उक्तं यत् एतत् निरीक्षणं चन्द्रस्य बाह्यमण्डलस्य, चन्द्रस्य वायुमण्डलस्य, चन्द्रमसि अन्तरिक्षे ऋतोः प्रभावस्य च अध्ययने साहाय्यं करिष्यति इति। एते निष्कर्षाः न केवलं चन्द्र-अन्तरिक्षयोः ऋतोः वैज्ञानिक-अवबोधं गहनं कुर्वन्ति अपितु भविष्ये चन्द्राभियानानां कृते, चन्द्रस्य उपरि मानव-वास-स्थलानां विन्यासस्य कृते च प्रभावान् जनयन्ति इति इस्रो इत्यनेन उक्तम्।

**<u>दीपोत्सव-उत्सवस्य</u>**

भगवतः श्रीरामस्य दिव्य-गृह-प्रत्यावर्तनस्य उपलक्ष्ये उत्तरप्रदेशे, अद्य सायङ्काले पवित्रनगर्यां अयोध्यायां वार्षिक-दीपोत्सवस्य नवम-संस्करणस्य कृते मञ्चः सज्जः अस्ति। नूतनं किर्तिमतं रचनाय सम्पूर्णे नगरे षड्विंशति लक्षतोप्यधिकाः दीपाः प्रज्वालिताः भविष्यन्ति।

प्रथमवारं दिल्ल्यामपि भव्यः दीपोत्सवः आचरितः। ह्यः कर्तव्यपथि उत्सवस्य उद्घाटनं कुर्वन्ती दिल्ली-राज्यस्य मुख्यमन्त्री रेखा गुप्ता अवदत् यत् दिल्ली-नगरे नूतनकथा लिखिता अस्ति।

**<u>मौसम</u>**

भारत-ऋतु-विभागेन अद्य केरल-माहे-लक्षद्वीपेषु पृथक्-पृथक् स्थानेषु प्रचण्डतः अतिवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। विभागेन कर्नाटकस्य, तमिल्नाडु-राज्यस्य, पुदुचेरी-राज्यस्य, करैकल-राज्यस्य, अण्डमान्-निकोबार्-द्वीपसमुहानां च केषुचित् भागेषु अपि प्रचण्डवृष्टेः संभावना प्रकटिता अस्ति।

**<u>आई.सी.सी. महिला क्रिकेट्</u>**

आई.सी.सी. महिलानां एकदिवसीय क्रिकेट्-विश्वचषक-क्रीडायाम् अद्य मध्यप्रदेशस्य इन्दौर-नगरस्य होल्कर्-क्रिकेट्-क्रीडाङ्गणे भारतं इंग्लैण्ड्-दलं सम्मुखी-करिष्यति। क्रीडायाः आरम्भः अपराह्णे त्रिवादने भविष्यति। तत्रैव पुरुष-क्रिकेट्-क्रीडायां, अद्य पर्थ-नगरे तिसृणां क्रीडा-श्रृङ्खलायाः आरम्भः अद्य भारत-आस्ट्रेलिया-दलयोः मध्ये भविष्यति । क्रीडायाः आरम्भः प्रातः नव-वादने भविष्यति।

**<u>संस्कृत - साप्ताहिकी</u>**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।